॥ श्रीः ।

श्रीवेङ्कटेशशतकम्

SRI

VENKATESA SATAKAM

BY

KAVYALANKARA

G. V. Padmanabha Sastri

Author of "George Devacharitam," "Bhringasandesa" etc., and an Examiner of the Madras University

SRIRANGAM:

SRI VANI VILAS PRESS.

1917.

FOREWORD.

I am glad that I have been accorded the privilege of writing a foreword to this excellent devotional poem in Sanskrit by Pandit Kavyalankara G. V. Padmanabha Sastrial Avergal. He has written various poems in Sanskrit and Malayalam, including a long poem on our beloved King-Emperor. In this poem the Pandit takes us to the lotus feet of the King of Kings and expresses the moods and longings and raptures of the man of purity of life and devotion of soul.

I have always felt that one of the greatest of our national duties is to carry forward the great and glorious tradition of Sanskrit composition in the realms of devotional poesy, philosophy, and religion. Sanskrit is even to-day a living language in the truest sense of the phrase and will be a living language so long as the Hindu race lives, and the Hindu race dowered above all other races with refinement, insight, and glory of vision and glory of achievement can live a great and memorable and virgorous life only so long as the Sanskrit

language is with us as our God-given guardian-angel Each age must compose its own devotional songs, write its own philosophical works, and utter its own spiritual intuitions to soothe and heal the sorrows of the heart. I hence welcome the Pandit's work as a valuable contribution in this direction

The poem is full of the charm of simplicity and sincerity and the occasional flashes of humour in it heighten the effect of the pathos and yearning that necessarily underlie all spiritual aspiration that realises the gulf between the joys of God-love and God-vision and the bondage of the ways of the world and the life of the senses. The poem is singularly free from all sectarian feeling and expresses those noble and natural feelings of dependence upon and love of God which are the deepest, sweetest, and highest of human emotions. I shall quote here a few of the beautiful stanzas in the poem.

कलौ जनानामिह पातकाति-

गदं दयालो समपाकरिष्णुः ।

विराजसे त्वं तु महौषधीव

सप्ताद्रिमध्ये च रुजां निहन्त्री ॥

धनं च सर्वं पृथुकप्रदात्रे
कुचेलविप्राय वितीर्य मोदात् ।
धनार्जनं कर्तुमिह स्थितोऽसि
निक्षिप्य कोशं पुरतो रमेश ॥

भूमिः पदं ते वियदेव नाभि-
र्द्यौरेव शीर्षं मुखमेव वह्निः ।
प्राणोऽनिलो नेत्रयुगं रवीन्दू
श्रुतिर्दिशो विश्वमयो ह्यतोऽसि ॥

I am very glad to learn that M. R. Ry. Diwan Bahadur M. O Parthasarathi Iyangar Avergal, whose interest in Hindu religion and Dharma and whose wide sympathies and high culture are well-known, has interested himself in the publication of this work. I wish the author every success and heartily join with him in his view that all that we do should be dedicated to the Lord.

श्रीनिवासार्पणमस्तु.

Srirangam.
26th. November, 1917.

K. S. RAMASWAMI SASTRI.
District Munsiff, Srirangam.

॥ श्रीः ॥

॥ भूमिका ॥

अहं तावदस्मच्चक्रवर्तिनो डिल्लीसाम्राज्यपट्टाभिषेकमधिकृत्य संस्कृतभाषायां जार्जदेवचरितं नाम पञ्चदशसर्गात्मकं महाकाव्यम्, अन्यानि द्वित्रिचतुराणि भृङ्गसंदेशादीनि भाषाकाव्यानि च व्यरचयम्। तावतैवात्मानं कृतार्थं नाचिन्तयम्। पुनरपि गीर्वाणभाषायामैश्वरं कंचन प्रबन्धं निर्मित्सुर्यदृच्छया श्रीमतो मुनिस्वाम्यार्यात्मजस्य विवाहस्य कृतेऽलोमोरुमङ्गापुरमयासिषम्। तदैकस्मिन्भृगुवासरेऽन्यैरप्यस्मत्सुहृद्भिः सममारुह्य श्रीवेंकटाद्रिं तदीशस्य महाभिषेकावसरे दयितया तत्संनिधिमगमम्। तत्र पयोघटैरभिषिक्तं श्रीनिवासमद्राक्षम्। तदवस्थं तमेव हृदि ध्यायंस्तद्भक्त्या विवशीकृतान्तरङ्गोऽभूवम्। किंतु तमेव क्षीराभिषेकमुत्प्रेक्षारूपेणादिमे पद्ये समयूयुजम्। ततो ललितपदसंघटितेनाभिनवोल्लेखेन पद्य-

शतकेन भगवन्तं श्रीनिवासमस्ताविषम्। अत्र प्रतिपादितवस्तुगौरवादेवैतं प्रबन्धमार्या आस्तिकशिखामणयो महान्तो विद्वांस आद्रियेरन्निति परं विश्वसिमि। एतत्प्रबन्धमुद्रणामूल्यं यावदुपकृतवद्भ्यो महाशयेभ्यो वावदूकाग्रगण्येभ्योऽस्मद्देशीयन्यायसभायां न्यायाध्यक्षपदमलंकृत्योपनिवृत्तेभ्यो दिवान्बहदूरिति विरुदोपशोभितेभ्य एम् ए एम् एल् इत्युपपदभूषितेभ्य एम् ओ. पार्थसारथि अय्यङ्गारिति सुगृहीतनामभ्यो मदीयां कृतज्ञतां निवेदयामि। मया कृतेनानेन पद्यशतकेन भगवाञ्श्रीनिवासः परं प्रीणातु। किं चैतत्स्तोत्रपाठितॄणामार्याणां सर्वेषामास्तिकशिखामणीनामभ्युदयनिःश्रेयसपरंपरां भगवाञ्श्रीनिवास एव वितनोतु। तदर्थं भगवन्तं वयमभ्यर्थयामहे।

इति काव्यालंकार

पद्मनाभशास्त्री.

॥ श्रीः ॥

॥ श्रीवेङ्कटेशशतकम् ॥

पयोधिजायाः प्रणयं विधातुं
श्रीवेंकटाद्रौ प्रतिशुक्रवारम् ।
क्षीराभिषेकाख्यमिषेण तत्र
पयोधिमुत्पादयसि प्रभो त्वम् ॥ १ ॥

गिरिप्रियो भूतिसितश्च शंभुः
स्वयं च तत्तामनुगन्तुमिच्छुः ।
कर्पूरभूतीपरिमृष्टदेहो
गिरौ निवासाच्च शिवत्वमेषि ॥ २ ॥

कलौ जनानामिह पातकाति-
गदं दयालो समपाकरिष्णुः ।
विराजसे त्वं तु महौषधीव
सप्ताद्रिमध्ये च रुजां निहन्त्री ॥ ३ ॥

सिंहाङ्कितत्वात्तव वप्रमौलि:
श्रीशुक्रवारेषु महाभिषेकात् ।
दुर्गाक्षपासूत्सवसंविधाना-
च्छक्त्यात्मिकेति प्रतिभाति मूर्ति: ॥ ४ ॥

सृष्टिस्थितिध्वंसनकर्मदक्षा
शक्तिस्त्वदीयेति जगत्प्रसिद्धि: ।
बिभर्षि फाले लसदूर्ध्वपुण्ड्र-
व्याजेन तिस्रो बिरुदावलीस्ता:॥ ५ ॥

निजे ललाटे विपुलोर्ध्वपुण्ड्रा-
दर्चाविधौ स्वीकृततन्त्रमार्गात् ।
श्रीवैष्णवानां भजनीयमूर्ति:
सर्वत्र सर्वैस्त्वमुपासितोऽपि ॥ ६ ॥

जटाकलापेन हि दीर्घपृष्ठ-
श्रेष्ठप्रभूषासुविशेषभङ्ग्या ।
कर्पूरभूतीपरिसेवनेन
शैवैरपि त्वं खलु सेवितोऽसि ॥ ७ ॥

रमाकराभ्यां परिमर्दिताङ्घ्रेः
सापत्न्यरोषाकुलिता प्रिया भूः ।
त्वामत्यजत्तेन सुखाधिवासः
शेषाचलोऽयं समभूत्परं ते ॥ ८ ॥

सदा रमाया वहनात्तु लोके
स्त्रैणो भवानित्युदभूत्प्रवादः ।
क्रमेण तत्त्वं प्ररिहर्तुकामो
भार्यां विना तिष्ठसि वेंकटाद्रौ ॥ ९ ॥

धनं च सर्वं पृथुकप्रदात्रे
कुचेलविप्राय वितीर्य मोदात् ।
धनार्जनं कर्तुमिह स्थितोऽसि
निक्षिप्य कोशं पुरतो रमेश ॥ १० ॥

पुरा तु देवासुरयुद्धसीम्नि
चक्रेण दैत्यानवधीरनेकान् ।
कर्तुं तपस्तज्जनिताघशान्त्यै
वराद्रिमेतं समुपागतोऽसि ॥ ११ ॥

सुमेरुचक्रस्य तव प्रभावा-
त्समाहृता भक्तजनाः प्रकामम् ।
धनानि मोदेन विनिक्षिपन्ति
त्वत्कोशमध्ये समवाप्तकामाः ॥ १२ ॥

चतुर्भुजात्तासिगदारिशङ्ख-
स्तोमेन पीताम्बरवेष्टनेन ।
सर्वर्तुसूनाराचितस्रजा ते
साक्षान्महाविष्णुरिति प्रसिद्धिः ॥ १३ ॥

नित्यं तवाराधनपूर्तिकाले
मयूरबर्हव्यजनेन भक्त्या ।
श्रान्तं विचित्रान्ननिषेवणात्त्वां
संवीजयन्त्यर्चकविप्रमुख्याः ॥ १४ ॥

अनन्ततल्पे सुचिरं शयित्वा
निद्रातिरेकोद्भवदेहजाड्यः ।
विजृम्भणेनाशु समीकृतस्त्वं
तिष्ठन्निवाभासि वराचले हि ॥ १५ ॥

कलौ जनाः पापरता इति त्वं
तन्मध्यवासस्तु विगर्हणीयः ।
विसृज्य तस्माद्भुवि संनिवेशा-
न्समागतस्त्वं खलु पुण्यशैलम् ॥ १६ ॥

केचिच्च विष्णुं समुपासते वै
शिवं च केचित्प्रकृतिं च केचित् ।
गणेशमादित्यमथापरे त्वां
सर्वे भजन्त्यत्र विचित्रमेतत् ॥ १७ ॥

आसेतुहैमाचलवासिनोऽमी
भक्तास्त्वदासेवनबद्धदीक्षाः ।
भक्त्या भवन्तं परितो नमन्ति
वाञ्छन्ति मुक्तिं पुरुषात्पुराणात् ॥ १८ ॥

श्रीवेंकटेशो हि कलौ प्रसिद्धो
विष्णुश्च सर्वैरपि दर्शनीयः ।
इति प्रसिद्धे सुवचस्यनल्पां
मतिं दधानाः समुपासते त्वाम् ॥ १९ ॥

त्वदीयभक्ता अपि विष्णुलोकं
गन्तुं न शक्तास्तदनुग्रहाय ।
श्रीवेंकटाद्रौ सुकृतावतार-
स्तत्रैव वैकुण्ठमतिं विधत्से ॥ २० ॥

कलेबरार्धं खलु शंकरस्य
मूर्तिस्त्वदीयेति जगत्प्रसिद्धिः ।
अतस्तु मन्ये तव मूर्तिरेषा
श्रीशांभवी शक्तिमयीह विष्णो ॥ २१ ॥

वैखानसानां मतत‍त्त्वमेत-
त्त्वद्भुक्तवस्त्रान्नसुगन्धमाल्यैः ।
तीर्थोदकैश्चार्चितसर्वगात्रा
मायां त्वदीयामपि ते तरन्ति ॥ २२ ॥

त्वन्नामधेयानि मुखेषु येषां
त्वद्रूपधेयानि हृदन्तराले ।
तद्भागधेयातिशयं च वक्तुं
को वा क्षमेतात्र महानुभाव ॥ २३ ॥

त्वदीयमाल्यान्यपि केशपाशे
त्वद्भुक्तभक्तान्युदरेषु येषाम् ।
त्वत्पादतीर्थान्यपि मस्तकेषु
त्वत्तुल्यतां यान्ति जनाः सुपूज्याः ॥२४॥

त्वदीयचक्राङ्कितसर्वगात्रा-
स्त्वदीयमुद्राङ्कितफालदेशाः ।
त्वद्भक्तभक्ता इति सुप्रसिद्धाः
श्रीवैष्णवास्त्वत्समतां प्रयान्ति ॥ २५ ॥

अनन्तकल्याणगुणात्मकं त्वां
मायाविमुक्तात्मतनुं महात्मन् ।
यजन्ति यज्ञैरपि वैष्णवा ये
त्वद्रूपतां यान्ति तदेव मुक्तिः ॥ २६ ॥

श्रीवैष्णवानामपि मुक्तिरेषा
त्वदीयसारूप्यमनन्तशायिन् ।
त्वद्भक्तभक्त्या परिचर्यया ते
स्वामिँल्लभन्ते तव रूपसाम्यम् ॥ २७ ॥

काचित्सुकन्या विकचाब्जहस्ता
क्षीराब्धिमध्यादुदभूत्पुरा हि ।
हरिं पतिं सा चकमे च साक्षा-
द्विवाह आसीत्तु तयोस्तटान्ते ॥ २८ ॥

परं तु वैवाहिकवेषभूषा-
विशेषविद्योतितसर्वगात्रौ ।
श्रीश्रीनिवासाख्यवधूवरौ तौ
प्रस्थातुकामौ किल वेंकटाद्रिम् ॥ २९ ॥

स्वभक्तलोकाय शिवं प्रदातुं
कल्याणनारायणनामधेयः ।
अद्यापि वैवाहिकवेषयुक्तः
शेषाचले त्वं वससीह विष्णो ॥ ३० ॥

भार्या त्वलोमोर्विति सुप्रसिद्धा
त्वामन्वधावत्प्रियभक्तियुक्ता ।
शेषाद्रिमारूढवति त्वयीति
पुनर्निवृत्ता ह्यबलाधिसानु ॥ ३१ ॥

गव्यूतिमात्रान्तरसंनिवेशे
स्वनामधेयाख्यपुरं विधाय ।
कोपेन कान्तं परिहृत्य पश्चा-
त्तापेन तप्ता प्रियवत्सला सा ॥ ३२ ॥

कान्तापराधाघमसौ प्रमार्ष्टुं
हेमाद्रिणा प्रोक्तविधिं विधित्सुः ।
वधूवराणां च विवाहकर्म
नित्यं हि सा कारयति स्वधाम्नि ॥ ३३ ॥

अनेकदेशागतवर्णिनोऽमी
त्वदीयभार्यानिकटे विवाहम् ।
दिनैकदेशेन समापयन्ति
स्मार्तं विधिं तेऽपि परित्यजन्ति ॥ ३४ ॥

युष्मत्प्रियाभ्यां पृथिवीरमाभ्यां
परं विसृष्टस्त्वमतीव रुष्टः ।
विहाय गार्हस्थ्यपदं परेश
वैखानसीं वृत्तिमुपाश्रितोऽसि ॥ ३५ ॥

अतस्तु मन्ये तव पूजनार्थं
वैखानसीं रीतिमुपेत्य नूनम् ।
श्रीवैष्णवाश्चाखिलतन्त्रजालै-
र्नित्यं समाराधनमाचरन्ति ॥ ३६ ॥

वेदाश्च सर्वे प्रतिपादयन्ति
विशन्ति यं पूरुषमस्तरागाः ।
ध्यायन्ति यस्याङ्घ्रिमतीव सिद्धाः
सोऽयं पुमांस्त्वं खलु वेंकटेश ॥ ३७ ॥

अनन्तकल्याणगुणाभिराम
सोऽहं दिदृक्षुस्तव पादपद्मम् ।
मत्तातपादैः कृतपुण्यलेशा-
च्छ्रीवेंकटाद्रिं समुपागतोऽस्मि ॥ ३८ ॥

प्रसीद देवेश दयापयोधे
संसारदावानलदाहतप्तम् ।
भीतं प्रपन्नं परिपाहि मृत्योः
शरण्यमन्यं यदहं न जाने ॥ ३९ ॥

तवाङ्घ्रिपोतेन तरन्ति लोके
महर्षयो भीमभवाम्बुराशिम् ।
कलत्रपुत्रारितिमिंगिलाद्यै-
रापूरितं वत्सपदं यथाम्भः ॥ ४० ॥

त्वत्पादपद्मं हृदयाब्जमध्ये
ध्यायन्ति नित्यं मुनयो महान्तः ।
मुनीन्द्रहृत्पद्मनिलीनमेत-
त्कथं पुनर्द्रष्टुमहं समर्थः ॥ ४१ ॥

भूरेणवस्त्वत्पदपद्मलग्नाः
पङ्कीभवन्तीति पदद्वयस्य ।
श्रीपादुकाभ्यां भरणं महात्म-
न्युक्तं च यत्तीर्थपदस्य तस्य ॥ ४२ ॥

त्वत्पादविन्यासमियं प्रिया भूः
साक्षाच्च वोढुं परमक्षमेति ।
श्रीपादुकाभ्यां व्यवधाय पश्चा-
त्पदं च भूमौ निदधासि किं नु ॥ ४३ ॥

श्रीशङ्खचक्रध्वजपद्मरेखा-
विभूषिते ते पदपङ्कजे द्वे ।
श्रीपादुकाभ्यां पिदधासि भूम-
न्गोपायितुं देवरहस्यमीश ॥ ४४ ॥

त्वत्पादपद्माङ्कितरेणवो ये
नारीविसर्गेषु परं समर्थाः ।
निदर्शनं गौतमधर्मपत्नी
तत्पादुकाभ्यां पिदधासि रेणून् ॥ ४५ ॥

त्वत्पादरेण्वङ्कितमस्तकोऽसौ
सृष्टिं विधाता विदधाति लोके ।
श्रीपादुकाभ्यामपिधानमेषां
युक्तं तदन्येष्वपहारभीत्या ॥ ४६ ॥

कुक्षिस्थलोकं च भवन्तमेतौ
त्वत्पादकूर्मौ वहतो रमेश ।
तौ पादुके त्वत्पदशोभिते द्वे
त्वया सहेत्यत्र विचित्रमेतत् ॥ ४७ ॥

त्वत्पादपद्माश्रितपादुके ते
राज्यं च वोढुं परमं क्षमेते ।
निदर्शनं कोसलराजसूनु-
श्चतुर्दशाब्दान्भरतो बभार ॥ ४८ ॥

ज्ञानक्रियाख्ये ह मदीयशक्ती
वश्ये ममेत्यत्र विडम्बनार्थम् ।
श्रीपादुकाद्वन्द्वमिषेण देव
बिभर्षि पद्भ्यां द्वितयं हि शक्तेः ॥ ४९ ॥

त्वत्पादयुग्मं परिमाणदण्डो
लोकत्रयस्यापि परं परेश ।
त्रिविक्रमत्वे तव पादपद्मे-
नाक्रान्तमेतद्भुवनत्रयं नु ॥ ५० ॥

स्वभावरक्ते तव पादपद्मे
नखप्रभाभिः परितः प्रक्ल‍ृप्ते ।
विडम्बयेते हि सिताब्जभावं
परं तु पारावतयुग्मसाम्यम् ॥ ५१ ॥

त्वत्पादपद्माञ्चितपादुके द्वे
हेम्ना कृते वज्रमणीन्द्रयुक्ते ।
भक्त्या स्वमूर्ध्ना दधते मनुष्या
भजन्ति विष्णोस्तव रूपसाम्यम् ॥ ५२ ॥

रमाभुजाभ्यन्तरमर्दितस्य
श्रीचक्रराजोज्ज्वलितस्य विष्णो ।
श्रीवत्सचिह्नेन सुशोभितस्य
स्तोतुं न शक्नोम्युरसो विशेषम् ॥ ५३ ॥

मूर्तिः कृते ते सितपङ्कजाभा
त्रेतायुगे रक्तजपासमाना ।
दूर्वादलश्यामनिभा तृतीये
कार्ष्णी तुरीयेति जगत्प्रसिद्धिः ॥ ५४ ॥

श्रीवेंकटाद्रौ तु शिलामयी या
मूर्तिर्विशिष्टा खलु सर्ववर्णैः ।
श्रीचूर्णकर्पूरपटीरपङ्क-
कस्तूरिकालेपनतो विभाति ॥ ५५ ॥

हेम्ना कृतोऽसौ ध्वजदण्डकाण्डः
श्रीवेंकटाद्रीशपुरोपकण्ठे ।
विभाति सत्यं पुरुषोत्तमस्य
वैकुण्ठलोकादवतारदण्डः ॥ ५६ ॥

वेदाः समस्ताः खलु सोमकेन
नीताः पुरा भोगिपुराधिवासम् ।
मीनाकृतिस्तानगृहे हरिर्य-
स्तं श्रीनिवासं शरणं गतोऽस्मि ॥ ५७ ॥

पुरा तु पीयूषकृते सुरेन्द्रैः
क्षीरार्णवे संमथिते नगेन ।
मग्नं नगं कूर्मतनुर्बभार
तं श्रीनिवासं शरणं गतोऽस्मि ॥ ५८ ॥

भूमिं हिरण्याक्षभुजान्तरस्था-
मुद्धर्तुकामः किल कोलरूपः ।
जग्राह जीवेन हरिश्च तस्य
तं श्रीनिवासं शरणं गतोऽस्मि ॥ ५९ ॥

प्रह्लादसंरक्षणजागरूको
हिरण्यपूर्वं कशिपुं निहन्तुम् ।
स्तम्भान्नृसिंहाकृतिराविरासी-
त्तं श्रीनिवासं शरणं गतोऽस्मि ॥ ६० ॥

पुत्रश्च भूत्वा ह्यदितेः प्रसन्नो
वट्वाकृतिस्तद्बलियज्ञवाटम् ।
गत्वा ययाचे त्रिपदा भुवा य-
स्तं श्रीनिवासं शरणं गतोऽस्मि ॥ ६१ ॥

दैत्यांशसंभूतधरापतीन्द्रां-
स्त्रिःसप्तकृत्वो निजघान रोषात् ।
योऽसौ हरिर्भार्गवरामरूप-
स्तं श्रीनिवासं शरणं गतोऽस्मि ॥ ६२ ॥

पौलस्त्यपुत्रं भुवि कण्टकं यः
सपुत्रमित्रं च रणे निहन्तुम् ।
रामोऽपि भूत्वा न्यवधीद्दशास्यं
तं श्रीनिवासं शरणं गतोऽस्मि ॥ ६३ ॥

कंसस्य भृत्यौ हि वनालयौ तौ
गोपालनारीषु कृतापराधौ ।
हरिर्निहन्तुं बलरामरूप-
स्तं श्रीनिवासं शरणं गतोऽस्मि ॥ ६४ ॥

कंसादिदुष्टानिह चैद्यमुख्या-
न्भूपाननेकान्विनिहन्तुकामः ।
हरिः स गोपाकृतिराविरासी-
त्तं श्रीनिवासं शरणं गतोऽस्मि ॥ ६५ ॥

कल्कीभविष्यन्नपि पाण्ड्यदेशे-
ऽधर्मे रताञ्शम्भलनामपुर्याम् ।
प्रध्वंसयिष्यत्यधमान्हरिर्य-
स्तं श्रीनिवासं शरणं गतोऽस्मि ॥ ६६ ॥

करीन्द्रविक्रन्दितमार्तबन्धुः
श्रुत्वा च भूत्वा पुरतः क्षणेन ।
अदाच्च मुक्तिं कृपया हरिर्य-
स्तं श्रीनिवासं शरणं गतोऽस्मि ॥ ६७ ॥

वैराजलोकं प्रति गन्तुकामा
　　वैराजरूपं हृदि चिन्तयन्तः ।
वैराजरूपस्य च ते गुणौघां-
　　स्त्वदीयभक्ता अनुवर्णयन्ति ॥ ७६ ॥

अनाद्यविद्याप्रतिबन्धहेतो-
　　र्भार्यात्मजादिष्वनुषक्तचित्ताः ।
नित्यं च तत्पोषणजागरूका
　　मुग्धा जनास्त्वां न विचारयन्ति ॥ ७७ ॥

यज्ञेन दानेन तवार्चनेन
　　भक्त्या परं त्वां तपसा रमेश ।
प्रीणन्ति नित्यं भुवि मानवा ये
　　मायां त्वदीयामपि ते तरन्ति ॥ ७८ ॥

मायाविसृष्टाः कृतिनो महान्त-
　　स्त्वत्पादसंदर्शनजागरूकाः ।
विचिन्त्य चात्मन्यवलोकयन्ति
　　त्वामेव विष्णुं पुरुषं पुराणम् ॥ ७९ ॥

वेदा अमी त्वद्गुणवर्णनेषु
नालं क्षमास्ते त्रिगुणात्मका नु ।
वेदान्तवेद्योऽसि परं तु साक्षा-
त्कर्तुं च वेदाः कथमीशितारः ॥ ८० ॥

स्थूलस्वरूपं परिवर्णयन्ति
वेदा अमी स्थूलदृशां प्रियाय ।
सूक्ष्मस्वरूपं तव सूक्ष्मदृष्ट्या
महर्षयो वेदितुमप्यशक्ताः ॥ ८१ ॥

अथापि सर्वत्र विलोकनाय
पीताम्बरालंकृतदिव्यमूर्तिः ।
श्रीवेंकटाद्रौ सुकृतावतार-
श्चतुर्भुजेष्वात्तवरायुधस्त्वम् ॥ ८२ ॥

कल्पान्तसूर्यप्रतिमं महात्म-
न्विराजमानं भवदीयहस्ते ।
वैराजतेजोंशमहो निरीक्ष्य
चक्रं विजानन्ति जनास्तु मोहात् ॥८३॥

क्षीरार्णवोज्जृम्भितफेनतुल्यो
न पाञ्चजन्यः करशोभिशङ्खः ।
त्वया हतः पञ्चजनोऽसुरेन्द्र-
स्तस्माच्च संभूतयशस्तदेतत् ॥ ८४ ॥

वैराजरूपस्य रहस्यमेत-
दूपां हरे शङ्खवरस्तु नूनम् ।
अनेन दैत्या बहवो विनष्टाः
पुरा रणे ह्यस्य रवेण दुष्टाः ॥ ८५ ॥

नायं तु कौक्षेयक एष विष्णोः
कल्पान्तकालेऽखिलनिग्रहाय ।
करे बिभर्ष्येव हि वैद्युतस्य
तेजोविलासस्य परंपरां ताम् ॥ ८६ ॥

नाहं तु मन्ये बहुदानवघ्नीं-
कौमोदकीं हस्तगतां प्रियां ते ।
वैराजरूपस्य च तत्त्वमेत-
न्नूनं पृथिव्या इति चिन्तयामि ॥ ८७ ॥

नायं सुपर्णोऽखिलवेदमूर्ति-
स्त्वामुद्वहन्नार्तजनैकबन्धो ।
वेदाधिरूढोऽहमितीश लोके
प्रथां विधातु गरुडाधिरूढ. ॥ ८८ ॥

सर्वर्तुपुष्पैः समलंकृता या
माला कदम्बाख्यसुमाधिकाढ्या ।
आपादलम्बिन्यवभासते सा
मायेति मन्ये गुणभेदयुक्ता ॥ ८९ ॥

सांख्यं च योगं तव कुण्डले द्वे
च्छन्दोमयं पीतमिदं च वासः ।
ज्योतिस्तु ते कौस्तुभरत्नमेत-
द्वत्सं तदीया भगवन्प्रभा हि ॥ ९० ॥

कालस्वरूपं तव चापदण्ड-
स्तथैव तत्कर्ममयो निषङ्गः ।
इमे च बाणा अपि चेन्द्रियाणि
कालात्मकं त्वामत एव मन्ये ॥ ९१ ॥

भूमिः पदं ते वियदेव नाभि-
द्यौरेव शीर्षं मुखमेव वह्निः ।
प्राणोऽनिलो नेत्रयुगं रवीन्दू
श्रुतिर्दिशो विश्वमयो ह्यतोऽसि ॥ ९२ ॥

वासः समुद्रे शयनं फणीन्द्रे
नाभौ सरोजं विधिरेव तस्मिन् ।
कुक्षौ च लोका हृदयेऽब्धिजा ते
को वा विजानाति महत्त्वमीश ॥ ९३ ॥

भूमिस्थरेणून्गणयेत्कदाचि-
त्तारागणानां गणनापि वा स्यात् ।
स्वामिन्गुणाना गणनां विभो ते
केनापि कर्तुं भुवनेष्वशक्यम् ॥ ९४ ॥

एवं स्थिते त्वद्गुणवर्णने मे
प्रवृत्तिरेषा परिहासहेतुः ।
तथापि भक्त्या तव विश्वनाथ
स्तोत्रे रतासीन्मतिरीश्वरस्य ॥ ९५ ॥

धनेन कोशं परिपूरयन्ति
सर्वे जना इत्यतिदीनचेताः ।
अकिंचनत्वाच्छतपद्यबन्धै-
रापूरयं कोशगृहं त्वदीयम् ॥ ९६ ॥

त्वन्माययाहं परिबाध्यमानो
भार्यात्मजादिष्वधिकप्रसक्तः ।
रजोगुणाकृष्टमतिर्भवन्तं
नाचिन्तयं ह्यपवर्गहेतुम् ॥ ९७ ॥

स्वामिन्मदीयानुमतिं विनैव
स्वकीयकण्ठस्थितहेमसूत्रम् ।
कोशे समर्प्याशु भवत्प्रसादं
वाञ्छत्यसौ मे कुलधर्मपत्नी ॥ ९८ ॥

एनां विभो मे दयितां प्रसीद
रुग्णां सपुत्रामिह पौत्रयुक्ताम् ।
एतैरहं त्वां शरणं प्रपन्नो
मां रक्ष रक्षाखिललोकनाथ ॥ ९९ ॥

स्तवमिममतिरम्यं वेंकटेशस्य विष्णो-
रखिलभुवनबन्धोरार्तसंरक्षकस्य ।
व्यरचयदतिभक्त्या पण्डितः पद्मनाभः
कृरियमखिलानां भूतये स्याज्जनानाम् ॥

इति श्रीपद्मनाभकविविरचितं श्रीवेंकटेशशतकं संपूर्णम् ॥

यदीयपादाङ्कितमस्तकोऽसौ
बलिस्तु पातालतले चकास्ति ।
अभूतपूर्वे त्रिदिवेऽधुनापि
तं श्रीनिवासं शरणं गतोऽस्मि ॥ ६८ ॥

पाञ्चालकन्यापरिदेवनं यः
श्रुत्वा सभायां करुणापयोधिः ।
ररक्ष तां दुष्टकृतापमाना-
त्तं श्रीनिवासं शरणं गतोऽस्मि ॥ ६९ ॥

यदीयपादोद्भवधूलिलेपा-
च्छिलामयी गौतमधर्मपत्नी ।
शापात्प्रमुक्ता प्रकृतिं गता च
तं श्रीनिवासं शरणं गतोऽस्मि ॥ ७० ॥

य उत्तरागर्भगतो हि विष्णु-
र्द्रौण्यस्त्रविप्लुष्टमहो शरीरम् ।
ररक्ष चक्रेण परीक्षितोऽसौ
तं श्रीनिवासं शरणं गतोऽस्मि ॥ ७१ ॥

सुनीतिपुत्रं शरणं प्रपन्न-
मङ्कं पितुः स्वस्य हि याचमानम् ।
आरोपयच्छाश्वतिकं पदं य-
स्तं श्रीनिवासं शरणं गतोऽस्मि ॥ ७२ ॥

चत्वार एते तव मूर्तिभेदाः
प्रद्युम्नसंकर्षणवासुदेवाः ।
अन्योऽनिरुद्धोऽपि च वैष्णवाना-
मर्चाविधौ ध्यानसुखाय क्लृप्ताः ॥ ७३ ॥

मुक्तिप्रदाताप्यहमेक एव
नान्येऽपि देवा इति बोधनार्थम् ।
मुकुन्दशब्दं हि भवान्बिभर्ति
त्वय्येव तन्नाम परं यथार्थम् ॥ ७४ ॥

प्रत्यक्षदैवं खलु मानवानां
तिष्ये युगे त्वं ननु वेंकटेश ।
वाञ्छन्ति यद्यत्त्वयि भक्तिमन्त-
स्तत्तल्लभन्ते तव वैभवेन ॥ ७५ ॥